M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. ____
Ser. 537

Title: Dahavidhi

337

दाहविधिः

Dāhavidhi	Title
Āshwalāyana	Author
	Editor
	Year, Vols.
	Publisher
337	Remarks

कर्त्ता प्राचीनावीत्याग्नेय्याभिमुखः सर्वं कुर्यात्। ततो दाहदेशं प्रत्याहवनीयाद्यग्नि स्तदनु
दृषदमुपलं लोहवर्जितयज्ञपात्राणि वैपरीत्येन वा सजातीया नयेयुः। तदनु प्रेतमपुत्रो वृद्धा
येयुः। प्रेताग्निपात्राणामन्योन्यस्पर्शनं कुर्यात्। अनुस्तरणी तु कृता कृतेति निहायते। प्रेत
स्य पुत्राद्यश्चाधःकृतप्रावरणोपवीता मुक्तकेशा हृद्धपुरःसराः पश्चाद्गच्छेयुः। तं देशं प्रा
प्य सर्वं निधाय दहनार्थी ईशाने वितस्तिमात्रं गर्त्तं कृत्वा तत्रोदकमवकाशोपालं च निदध्यात्।
ततः कर्त्ता पादौ प्रक्षाल्याचम्य मंत्रकं प्राणायामं कृत्वा देशकालौ संकीर्त्यामुकगोत्रस्या
मुकशर्मणो मम पितुः प्रेतस्य प्रेतत्वविमोक्षार्थं और्ध्वदैहिकं करिष्य इति संकल्प्य कर्त्ता प
सव्यः पूर्वोक्तगर्त्तादिकेन तदभावेऽन्येन वोदकेनाप्रदक्षिणं शमीशाखया दाहखातं परि
भ्रमन्नद्भिः प्रोक्षेत्। अपेतवीत विच सर्पतात इति मंत्रमावर्त्तयेत्। ततः खातान्ते तद्बहिर्वा
ग्नेय्यामाहवनीयं वायव्यां गार्हपत्यं नैर्ऋते दक्षिणाग्निं निधाय भूमिं प्रार्थयेत्। उपसर्पेति संकु
सुकः पितृमेधास्विषु प्र। मंत्रमुच्चार्य। अपसव्येन पतये प्रेताय केचिदिह पूर्वजाः। स्वस्ति नः
कृणुत माक्रम्यातः पुनरागमत्। ततो द्विवितस्तात्मकं अप्रकृतां तीर्थ इति सर्वां भूमिं प्रोक्ष्य यमाय

दहनपतये त्वोल्लिखामि। कालाय दहनपतये त्वोल्लिखामि। मृत्यवे दहनपतये त्वोल्लिखामि।
इति मंत्रत्रयेणापसव्येन रेखात्रयं भूमावुल्लिख्य खाते तिलोदकं क्षिपेत्। यमाय दहन
पतये पितृभ्यः स्वधा नम इति मध्ये। कालाय दहन० नम इत्युत्तरतः। मृत्यवे दहन० नम इति
दक्षिणतः। आहवनीयादुत्तरतश्चमसेनापः प्रणयेद्दर्भी। खाते हिरण्यशकलं तिलांश्च प्रक्षि
प्य सजातीया हतयज्ञियकाष्ठैश्चितिं कुशलाः सजातीयाः कुर्युः। कर्त्ता चितौ बर्हिरास्तीर्य
तत्रोर्ध्वलोमाजिनमास्तीर्य गार्हपत्यादुत्तरेण प्रेतं नीत्वा आहवनीयाभिमुखशिरसं चि
तौ संवेशय प्रेतस्योत्तरतश्चितौ तत्पत्नीं संवेशयेत्। तां देवरः शिष्यो जरद्दासो वोत्थापयेत्।
उदीर्ष्वेति मंत्रेण। प्रेतस्य मुखादिषु हिरण्यशकलानि आज्यबिंदून्वा प्रक्षिप्य प्रेतेध्मा
ताक्तां स्तिलानवकीर्य पात्राणि योजयेत्। दक्षिणहस्ते जुहूं। ब० रूणमघासादो मरणे जुहू
हृदयमपि तत्रैव योज्यं। सव्यहस्त उपभृतं। वरुणमघासाद्यो दो हृदयमपि। दक्षिणपार्श्वे स्फ्यं। सव्ये
ग्निहोत्रहवणीं उरसि ध्रुवां। शिरसि कपालानि। सोमम ध्यमरणेऽभिषवग्रावाणो दं
तेषु योज्याः। स्रुचं भित्वा नासायां हूय। वरुणमघासी दोस्रुव हृद्यं। नासाहृये। प्राशित्रहरणं।

भित्वा कर्णद्वये। हविरासादनपात्रीं संमनत्तधानं चोदरे उपस्थापूम्यां। उर्वोररणी। दक्षिण
ऊंधायामुलूखलं। सव्यायां मुसलं। शूर्पं भित्वा पादयोः। यदा विद्यते तदा नसेकं योजयेत्।
अपराणि पात्राणि योगं योजयेत्। बिलवंति पात्राणि पृषदाज्येन पूरयित्वा योज्यानि। दृषदुपले
गुह्ये एव स्थाप्ये। लोहयुक्तं सर्वं पुत्रो गृह्णीयात्। ततोग्नेर्वर्मेति शिरसि मुखे च सत्यश्रयेनाच्छा
द्यातिद्रवति हस्ताभ्यां पाण्योः सक्तुपिंडावनधाय हृद्यान्यां गेषु च तत्ता सक्तुपिंडान्दत्वा इमम
ग्न इति चमसमानुमंत्रणं कृत्वा तूष्णीमाज्यमुत्पूय आज्यस्कं चं तूष्णीं संमृज्य दक्षिणाग्निं परिस
मुह्य पर्युक्ष्य परिस्तीर्य अंकधारणया अविरोधेन सव्यं जान्वाच्य आहुतिचतुष्टयं जुहुया
त्। अग्नये स्वाहा। कामाय स्वाहा। अनुमतये स्वाहेति। जान्वाच्य एव प्रेतारसि पंचमीमाहु
तिं अस्माद्वै त्वमजायथा इति मंत्रेण जुहुयात्। प्रेतोपरि काष्ठानि निधाय परिकर्मिभ्यः प्र
पं दद्यात्। युगपदग्नीन् प्रज्वलयेत्। युगपदेव प्रज्वालयेयुः। अतऊर्ध्वं कर्तव्यमनो 2
ग्निहितोवत्। इत्थिहप्रतीकोपात्तामंत्रास्तु दाहपद्धतौ द्रष्टव्याः॥ इति साग्निकदाहवि
धिः॥ ॥न क्षपक्षे मरणं चेन्नाहिताग्निसुहोमान्यायेन अवशिष्टहोमाः कार्याः। दर्शे छिद्यते देवकार्या

श्रीगणपतये नमः॥ आहिताग्नेराश्वलायनोक्तो दाहविधिः॥ मरणानंतरं दाहाधिका
रिणा मध्ये दशोच्छ्रितं समंतात् निम्नं पर्याकारं देशं श्मशानं कल्पयित्वा कंटकीक्षीरवृ
क्षानुद्धास्य अत्र भूम्येकदेशमाग्नेयीं नैर्ऋत्यां वा बहुलौषधिकं दक्षिणाप्रवणमाग्नेयी
प्रवणं नैर्ऋती प्रवणं वा यावदूर्ध्वबाहुर्पुरुषस्तावदायामं पंचारत्निविस्तृतं द्वाद
शांगुलगंभीरं आग्नेय्यायतं सजातीयैः खनयेयुः। ततः प्रेतस्य मलं प्रक्षाल्य स्नापयित्वा के
शश्मश्रुनखानि वापयित्वा नलदेनानुलिप्य नलदमालां तदभावे अपामार्गमालां वा प्रतिमु
च्य कर्ता देशकालौ स्मृत्वा पित्रादेरूर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टास्पृश्यस्पृष्ट खट्वा
मरणादिजनित प्रत्यवायपरिहारार्थं कृच्छ्रत्रयादिरूपं प्रायश्चित्तं संकल्प्य आत्मशुध्यर्थं च
कृच्छ्रत्रयं संकल्प्य कक्षोपस्थवर्ज्यं लोमनखानि वापयित्वा परिहितवस्त्रं प्राक्शिरसं प्रेतं
शाययित्वा अहतवाससश्चतुर्थं भागं मूलदेशे च शिष्ट्वा त्रिभिर्भागैः शिरःप्रभृति अंगु
ष्ठीपर्यंतं पादतलवर्ज्यं प्रेतमाच्छाद्य वाससश्चतुर्थभागेन आत्मानमुत्तरीयं प्रेतकार्येषु द्वाद
शाहांतं कर्ता कुर्यात्। बहुतरमाज्यं बर्हिश्चोपकल्पयेत्। दधिमिश्राज्यं च वहूपकल्पयेत्।